श्रीपुरुषोत्तमाष्टकम्

सम्पादकः- डः प्रदीप्त कुमार नन्दः

दिव्यभूषणहेमनिर्मितभूषितं तुलसीप्रियं
टाहिआधरराजशेखरराजपूजितसुन्दरम् ।
विश्ववन्दितचक्रधारकघोषकारकवैभवं
नौमि तं पुरुषोत्तमं वरदायकं परमेश्वरम् ॥१॥

गुण्डिचामखधारकं जनरञ्जनं रथहासिनं
नीलपर्वतनीलमाधवभक्ततारणदुर्लभम् ।
प्रेममिश्रितवारिशीतलचन्दनायितकेशवं
नौमि तं पुरुषोत्तमं वरदायकं परमेश्वरम् ॥२॥

दारुदैवतसर्वसुन्दरवेषकारितकौशलं
श्रीमहाप्रभुरूपमोहक इन्दिराप्रियवल्लभम् ।
रत्नमण्डपपूज्यपूजकरूपरूपिणमीश्वरं
नौमि तं पुरुषोत्तमं वरदायकं परमेश्वरम् ॥३॥

वेणुवादकगोपनायकक्षीरसागरशायिनं

राघवं मधुसूदनं भज लक्ष्मणाग्रजधन्विनम् ।

शान्तिदायकबुद्धभास्वरजैनजीवनरक्षकं

नौमि तं पुरुषोत्तमं वरदायकं परमेश्वरम् ॥४॥

भोगकारकअन्नखादकदिव्यजीवनयापिनं

धर्मरक्षकदुष्टनाशकशिष्टपालनकारितम् ।

क्षेत्रपूजितनेत्रमोहककञ्जआननमञ्जुलं

नौमि तं पुरुषोत्तमं वरदायकं परमेश्वरम् ॥५॥

नीलसागरतीरमन्दिरसज्जितं सुखसम्पदं

पूर्णकारणकार्यघोषितभेदबोधितभक्तिदम् ।

कूटवञ्चकचञ्चलाश्रितहारमण्डितकौस्तुभं

नौमि तं पुरुषोत्तमं वरदायकं परमेश्वरम् ॥६॥

दर्शनं नवयौवनं नविनं कलेवरधारिणं

कोटिभास्करदीप्तिधूपितदेवमानवदुर्लभम् ।

नन्दिघोषविहारकारणपार्थसारथिभाषिनं

नौमि तं पुरुषोत्तमं वरदायकं परमेश्वरम् ॥७॥

पापपंकिललोकदण्डितनन्दतारकचञ्चलं

दासभाजनशोकनाशनखेदभेदनसौष्ठवम् ।

हे रमावर कृष्णनागरजानकीचरनिर्जरं

नौमि तं पुरुषोत्तमं वरदायकं परमेश्वरम् ॥८॥

इति श्रीप्रदीप्तनन्दशर्मविरचतं श्रीपुरुषोत्तमाष्टकं सम्पूर्णम्